# Rudra VibhUti Stotram

# રુદ્રવિભૂતિસ્તોત્રમ્

## Document Information

Text title : Rudra Vibhuti Stotram

File name : rudravibhUtistotram.itx

Category : shiva

Location : doc_shiva

Transliterated by : mAnasataraNgiNI

Latest update : August 28, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 28, 2021

*sanskritdocuments.org*

# રુદ્રવિભૂતિસ્તોત્રમ્

નમઃ શિવાય રુદ્રાય કદ્રુદ્રાય પ્રચેતસે ।
મીઢુષ્ટમાય સર્વાય શિપિવિષ્ટાયરંહસે ॥ ૧॥

નમસ્તે કાલકાલાય નમસ્તે રુદ્ર મન્યવે ।
નમઃ શિવાય રુદ્રાય શઙ્કરાય શિવાય તે ॥ ૨॥

ઉગ્રોઽસિ સર્વભૂતાનાં નિયન્તાસિ શિવોઽસિ નઃ ।
નમઃ શિવાય શર્વાય શઙ્કરાયાર્તિહારિણે ॥ ૩॥

ગ્રહાધિપત્યે ભગવાનભ્યષિઞ્ચદ્દિવાકરમ્ ।
વૃક્ષાણાં ઓષધીનાં ચ સોમં બ્રહ્મા પ્રજાપતિઃ ॥ ૪॥

અપાં ચ વરુણં દેવં ધનાનાં યક્ષપુઙ્ગવમ્ ।
આદિત્યાનાં તથા વિષ્ણું વસૂનાં પાવકં તથા ॥ ૫॥

પ્રજાપતીનાં દક્ષં ચ મરુતાં શક્રમેવ ચ ।
દૈત્યાનાં દાનવાનાં ચ પ્રહ્લાદં દૈત્યપુઙ્ગવમ્ ॥ ૬॥

ધર્મં પિતૃણામધિપં નિરૃતિં પિશિતાસિનામ્ ।
રુદ્રં પશૂનાં ભૂતાનાં નન્દીનાં ગણનાયકમ્ ॥ ૭॥

વીરાણાં વિરભદ્રં ચ પિશાચાનાં ભયઙ્કરમ્ ।
માતૃણાં ચૈવ ચામુણ્ડાં સર્વદેવનમસ્કૃતામ્ ॥ ૮॥

રુદ્રાણાં દેવદેવેશં નીલલોહિતમીશ્વરમ્ ।
વિઘ્નાનાં વ્યોમજં દેવં ગજાસ્યં તુ વિનાયકમ્ ॥ ૯॥

સ્ત્રીણાં દેવીં ઉમાદેવીં વચસાં ચ સરસ્વતીમ્ ।
વિષ્ણું માયાવિનાં ચૈવ સ્વત્માનાં જગતાં તથા ॥ ૧૦॥

હિમવન્તં ગિરીણાં તુ નદીનાં ચૈવ જાહ્નવીમ્ ।
સમુદ્રાણાં ચ સર્વેષામધિપં પયસાં નિધિમ્ ॥ ૧૧॥

વૃક્ષાણાં ચૈવ ચાશ્વત્થં પ્લક્ષં ચ પ્રપિતામહઃ ॥ ૧૨॥

ગન્ધર્વવિદ્યાધરકિન્નરાણામીશં પુનાશ્ચિત્રરથં ચકાર ।
નાગાધિપં વાસુકિમુગ્રવીર્યં સર્પાધિપં તક્ષકમુગ્રવીર્યમ્ ॥ ૧૩॥

દિગ્વારણાનામધિપં ચકાર ગજેન્દ્રમૈરાવતમુગ્રવીર્યમ્ ।
સુપર્ણમીશં પતતામથાશ્વરાજાનામુચ્ચૈઃશ્રવસં ચકાર ॥ ૧૪॥

સિંહં મૃગાણાં વૃષભં ગાવાં ચ મૃગાધિપાનાં શરભં ચકાર ।
સેનાધિપાનાં ગુહમપ્રમેયં શ્રુતીસ્મૃતીનાં લકુલીશમીશમ્ ॥ ૧૫॥

અભ્યષિઞ્ચત્સુધર્માણં તથા શઙ્ખાપદં દિશામ્ ।
કેતુમન્તં ક્રમેણૈવ હેમરોમાણમેવ ચ ॥ ૧૬॥

પૃથિવ્યાં પૃથુમીશાનં સર્વેષાં તુ મહેશ્વરમ્ ।
ચતુર્મૂર્તિષુ સર્વજ્ઞં શઙ્કરં વૃષભધ્વજમ્ ॥ ૧૭॥

ઇતિ રુદ્રવિભૂતિસ્તોત્રં સમ્પૂર્ણમ્ ।

---

*Rudra VibhUti Stotram*

pdf was typeset on August 28, 2021

Please send corrections to *sanskrit@cheerful.com*